# प्रकृतिर्वेदना

(प्रस्तुत पाठ पर्यावरण सुधार को लक्ष्य कर लिखा गया एक संवाद परक पाठ है। इसमें नदी और वृक्ष के परस्पर वार्तालाप द्वारा यह बताने का प्रयास किया गया है कि नदियाँ रासायनिक तत्वों से किस सीमा तक प्रदूषित हो रही हैं, तथा निरन्तर काटे जाने से वृक्षों का कैसा विनाश हो रहा है ? पाठ का प्रारम्भ गर्मी से व्याकुल चार मित्रों के वार्त्तालाप से होता है। नदी में स्नान करते समय उन्हें प्रकृति (नदी और वृक्ष) की वेदना भरी आवाज सुनाई देती है।)

(ग्रीष्मर्तौ विद्युदभावे प्रचण्डोष्मणा पीडितः मयङ्कः गृहात् निष्क्रम्य)

**मयङ्कः** – उष्मणा पीडितोऽस्मि। शरीरात् स्वेदधाराः प्रस्रवन्ति। अये! मित्राणि इत आयान्ति।

**शशाङ्कः** – (आगत्य) वयस्य! घर्मोष्मणा व्याकुलोऽहम्।

**मयङ्कः** – अहमपि तथैव। आगच्छ खारुननदीतीरं गच्छामः।

(ते सर्वे नदीतीरं गच्छन्ति। मार्गे एकं सरः दृष्ट्वा)



**संस्कारः** – मयङ्क! पश्य अस्मिन् सरसि कानिचन् विकसितानि अन्यानि निमीलितानि पुष्पाणि सन्ति। एतत् कथं सम्भवति ?

मयङ्कः – मित्र! यानि सूर्योदये विकसन्ति तानि पद्मानि यानि च चन्द्रोदये विकसन्ति तानि कुमुदिनी इति।
(वार्तालापं कुर्वन्तः ते खारुननदीतीरं निमज्जन्ति)

संयोगः – हा हा हा! आनन्दप्रदोऽयं जल–विहारः।

मयङ्कः – आम्, सत्यमुक्तं भवता। शीतलेऽस्मिन् जले मन्देन समीरेण च मनः प्रसीदति।

शशाङ्कः – कीदृशं शोभनं दृश्यम्। मत्स्याः सरिति क्रीडन्ति। मण्डूकाः इतस्ततः प्लवन्ते। तटे समाहिताः कूर्माः जनानां सम्मर्दात् भीताः नद्याम् प्रविशन्ति।
(सहसा श्रूयते विषादमयः रोदनध्वनिः)

प्रथमा (शून्यवाणी) हा धिक्! हा धिक्! कीदृशं मम जीवनम्।

मयङ्कः – (इतस्ततः अवलोक्य) नद्याः स्वर इव प्रतीयते।
(अन्यतः अपि ध्वनिं श्रूयते)

द्वितीया (शून्यवाणी) ममापि च जीवनम्अत्यन्तं कष्टप्रदं जातम्।

संस्कारः – (साश्चर्यं विलोकयन्) वृक्षस्य स्वर इव प्रतीयते।
(मित्राणि ध्यानेन परस्परमवलोकयन्ति)

नदी – तव समस्या का अस्ति ? मां पश्य, जनाः रासायनिकैः अवकरैः मम जलं दूषयन्ति। कूर्माः, मकराः मत्स्यादयः सर्वे जलचराः संत्रस्ताः।

वृक्षः – आम्! सत्यं तव कथनं परं मम व्यथा त्वत्तोऽपि अधिका। त्वं प्रवहन्ती जीविता तु असि, परं निरन्तरं कर्तनेन वयं तु समूलाः एव नष्टाः भवामः।
(नदीवृक्षयोः एतादृशं विषादं श्रुत्वा ते परस्परं वार्तालापं कुर्वन्ति)

मयङ्कः – नदी वृक्षादयः प्रकृतेः उपहाराः। किन्तु अस्माभिः एते कीदृशी दशा प्रापिताः।

संयोगः – आम्! पश्य! तटे वर्तुलाकारेण स्थितेयं वृक्षावलिःमनसि एतावती व्यथा वहन्त्योऽपि समागतेभ्यः फलानि अर्पयन्ति।

मयङ्कः – निदाघे अस्मिन् एषा नदी अपि स्वशीतलेन जलेन अस्मान् आनन्दयति।

शशाङ्कः – अहम् अनुभवामि यत् येन केन प्रकारेण वृक्षकर्तनं जलप्रदूषणञ्च अवरोधनीयम्। अयमेव अस्माकं सङ्कल्पः स्यात्।

मयङ्कः – साधु! वयं मिलित्वा एतदर्थं जनजागरणाय प्रयत्नं करिष्यामः उक्तं च –
'परोपकाराय सतां विभूतयः'

## शब्दार्थाः

विद्युदभावे = (विद्युत्+अभावे) बिजली के अभाव में । प्रचण्डोष्मणा = (प्रचण्ड+ऊष्मणा) तेज गर्मी से । आतपकालः = ग्रीष्म ऋतु । स्वेदबिन्दवः = पसीने की बूँदें । प्रस्रवन्ति = फूट रही हैं, निकल रही है । आयान्ति = आ रहे हैं । घर्मोष्मणा = धूप के ताप से । निमीलितानि = बन्द । निमज्जन्ति = डुबकी लगाते हैं/स्नान करते हैं । वयस्य = मित्र । समीरेण = हवा से। सरिति= नदी में (सप्तमी एकवचन)। प्लवन्ते = तैरते हैं। सम्मर्दात् = दबने से । विषादमयः = दु:ख भरी।

त्वत्तोऽपि = तुम्हारे से भी । प्रवहन्ती =बहती हुई। कर्तनेन = काटने से । प्रापिता: = पहुँचा दी गई है । वर्तुलाकारेण = गोलाकार । वृक्षावलि: = पेड़ों की पंक्ति । व्यथा = कष्ट, पीड़ा । निदाघे = भीषण गर्मी में । अवकरै: = कूड़े–कचरे से । संत्रस्ता = परेशान (दु:खी) ।

## अभ्यासप्रश्ना:

**(1) निम्नलिखित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए –**

(क) मयङ्कस्य मन: कथं प्रसीदति ?
(ख) जना: नद्या: जलं कथं दूषयन्ति ?
(ग) वृक्षा: समागतेभ्य: किं यच्छन्ति ?
(घ) चतुर्णां मित्राणां क: सङ्कल्प: ?

**(2) निम्नलिखित कथन कौन किससे कहता है –**

(क) वयस्य! घर्मोष्मणा व्याकुलोऽहम् ............................
(ख) नद्या: स्वर इव प्रतीयते ............................
(ग) मम व्यथा तु त्वत्तोऽपि अधिका ............................
(घ) प्रकृते: उपहारा: अस्माभि: अद्य कीदृशी दशा प्रापिता: ............................

**(3) कोष्टक से विशेषण पदों को छाँटकर विशेष्य पदों के सम्मुख लिखिए –**

(भीता:, विषादमय:, कीदृशीम्, शीतले, वर्तुलाकारा)

| | विशेषणपदानि | विशेष्यपदानि |
|---|---|---|
| (क) | ......................... | जले |
| (ख) | ......................... | कूर्मा: |
| (ग) | ......................... | रोदनध्वनि: |
| (घ) | ......................... | वृक्षावलि: |
| (ङ) | ......................... | व्यथाम् |

QL1BK8

**(4) निम्नलिखित शब्दों का संस्कृत वाक्यों में प्रयोग कीजिए–**

(क) इतस्तत: ......................................................................
(ख) शरीरात् ......................................................................
(ग) ऊष्मण: ......................................................................
(घ) एकत: ......................................................................
(ङ) अन्यत: ......................................................................
(च) सम्मर्दात् ......................................................................
(छ) त्वत्तोऽपि ......................................................................